শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রী কন্তংচোক্কণ্ণ ৱিরচিতম্

# ॥ শ্রী চম্পকাপুরীশ্রীনিৱাসাষ্টকম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রী চম্পকাপুরীশ্রীনিৱাসাষ্টকম্ ॥

শৌভ্ররাজ রাজরাজ কঞ্জযোনি ৱন্দিতং
    নিত্যভক্তপূজিতং সুধন্ৱপূজকাঞ্চিতম্।
কঞ্জচক্রকৌস্তুভাসিরাজিতং গদাধরং
    চম্পকাপুরীনিৱাসমানিৱাসমাশ্রযে॥ **1** ॥

পন্নগারিযাযিনং সুপন্নগেশশাযিনং
    পঙ্কজারিপঙ্কজেষ্টলোচনং চতুর্ভুজম্।
পঙ্কজাতশোষকং ৱিপঙ্কজাতপোষকং
    চম্পকাপুরীনিৱাসমানিৱাসমাশ্রযে॥ **2** ॥

সর্ৱলোকনাযকং সুৱাঞ্ছিতার্থদাযকং
    শর্ৱচাপভঞ্জকং সগর্ৱরাৱণান্তকম্।
পীতচেলধারকং কুচেলরিক্তদাযকং
    চম্পকাপুরীনিৱাসমানিৱাসমাশ্রযে॥ **3** ॥

নারদাদিৱন্দিতং নৃনারশৈলভঞ্জিতং
    নারসদ্মৱাসজাতনারপূর্ৱকাযনম্।
নারতল্লজালযং কুনারকান্তকালযং
    চম্পকাপুরীনিৱাসমানিৱাসমাশ্রযে॥ **4** ॥

কালমেঘৱর্ণকং প্রকামমুক্তিদাযকং
    কালকালকারকং কুকালপাশদূরকম্।
রত্নৱর্মরাজৱর্ষ্মভানুবৃন্দভাস্করং
    চম্পকাপুরীনিৱাসমানিৱাসমাশ্রযে॥ **5** ॥

দক্ষশিক্ষকচ্ছিদং কুহাটকাক্ষসম্ভিদং
    যক্ষগীতসেৱিতং সুরক্ষণৈকদীক্ষিতম্।
অক্ষজাতমারকং কটাক্ষদৃষ্টিতারকং
    চম্পকাপুরীনিৱাসমানিৱাসমাশ্রযে॥ **6** ॥

স্ৱর্ণসূত্রগুম্ফিতোরুসালিকাশ্মমালিকং
    রত্নরত্নরঞ্জিতং গদাঞ্চিতং কৃপাকরম্।
প্রজ্ৱলৎকিরীটিনং প্রৱিস্ফুরত্ত্রিপুণ্ড্রকং
    চম্পকাপুরীনিৱাসমানিৱাসমাশ্রযে॥ **7** ॥

ৱক্রকান্তিৱঞ্চিতোরুশারদেন্দুমণ্ডলং
    কুন্দদন্তমিন্দিরেশমক্ষরং নিরামযম্।
মন্দহাসশুভ্রিতাশকিঙ্কিণীলসৎকটং
    চম্পকাপুরীনিৱাসমানিৱাসমাশ্রযে॥ **8** ॥

শ্রীনিৱাসমষ্টকম্ ভৱাব্ধিশোকশোষকং
    সর্ৱপাপনাশকং সুপুত্রপৌত্রদাযকম্।
যে পঠন্তি ভক্তিতঃ প্রযান্তি তে তু সর্ৱদা
    চম্পকাপুরীনিৱাসমানিৱাসসন্নিধিম্॥ **9** ॥

॥ ইতি শ্রী চম্পকাপুরীশ্রীনিৱাসাষ্টকম্ সমাপ্তম্॥